श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकत्रिंशः सर्गः ॥

## रावणस्य माहिष्मत्यां गमनं तत्रत्यं राजानमर्जुनमनुपलभ्य मन्त्रिभिः सह तेन विन्ध्यगिरिपार्श्वे नर्मदायां स्नात्वा भगवतः शिवस्य समाराधनम्

ततो रामो महातेजा विस्मयात् पुनरेव हि।
उवाच प्रणतो वाक्यमगस्त्यमृषिसत्तमम् ॥ 7.31.1 ॥

भगवन् राक्षसः क्रूरो यदाप्रभृति मेदिनीम्।
पर्यटत् किं तदा लोकाः शून्या आसन् द्विजोत्तम ॥ 7.31.2 ॥

राजा वा राजमात्रो वा किं तदा नात्र कश्चन।
धर्षणं यत्र न प्राप्तो रावणो राक्षसेश्वरः ॥ 7.31.3 ॥

उताहो हतवीर्यास्ते बभूवुः पृथिवीक्षितः।
बहिष्कृता वरास्त्रैश्च बहवो निर्जिता नृपाः ॥ 7.31.4 ॥

राघवस्य वचः श्रुत्वा अगस्त्यो भगवानृषिः।
उवाच रामं प्रहसन् पितामह इवेश्वरम् ॥ 7.31.5 ॥

इत्येवं बाधमानस्तु पार्थिवान् पार्थिवर्षभ।
चचार रावणो राम पृथिवीं पृथिवीपते ॥ 7.31.6 ॥

ततो माहिष्मतीं नाम पुरीं स्वर्गपुरीप्रभाम्।
सम्प्राप्तो यत्र सान्निध्यं सदासीद् वसुरेतसः ॥ 7.31.7 ॥

तुल्य आसीन्नृपस्तस्य प्रभावाद् वसुरेतसः।
अर्जुनो नाम यत्राग्निः शरकुण्डेशयः सदा ॥ **7.31.8** ॥

तमेव दिवसं सोऽथ हैहयाधिपतिर्बली।
अर्जुनो नर्मदां रन्तुं गतः स्त्रीभिः सहेश्वरः ॥ **7.31.9** ॥

तमेव दिवसं सोऽथ रावणस्तत्र आगतः।
रावणो राक्षसेन्द्रस्तु तस्यामात्यानपृच्छत ॥ **7.31.10** ॥

क्वार्जुनो नृपतिः शीघ्रं सम्यगाख्यातुमर्हथ।
रावणोऽहमनुप्राप्तो युद्धेप्सुर्नृवरेण ह ॥ **7.31.11** ॥

ममागमनमप्यग्रे युष्माभिः सन्निवेद्यताम्।
इत्येवं रावणेनोक्तास्तेऽमात्याः सुविपश्चितः ॥ **7.31.12** ॥

अब्रुवन् राक्षसपतिमसान्निध्यं महीपतेः।
श्रुत्वा विश्रवसः पुत्रः पौराणामर्जुनं गतम् ॥ **7.31.13** ॥

अपसृत्यागतो विन्ध्यं हिमवत्सन्निभं गिरिम्।
स तमभ्रमिवाविष्टमुद्भ्रान्तमिव मेदिनीम् ॥ **7.31.14** ॥

अपश्यद् रावणो विन्ध्यमालिखन्तमिवाम्बरम्।
सहस्रशिखरोपेतं सिंहाध्युषितकन्दरम् ॥ **7.31.15** ॥

प्रपातपतितैः शीतैः साट्टहासमिवाम्बुभिः।
देवदानवगन्धर्वैः साप्सरोभिः सकिन्नरैः ॥ **7.31.16** ॥

स्वस्त्रीभिः क्रीडमानैश्च स्वर्गभूतं महोच्छ्रयम्।
नदीभिः स्यन्दमानाभिः स्फटिकप्रतिमं जलम् ॥ **7.31.17** ॥

फणाभिश्चलजिह्वाभिरनन्तमिव विष्ठितम्।
उत्क्रामन्तं दरीवन्तं हिमवत्सन्निभं गिरिम् ॥ **7.31.18** ॥

पश्यमानस्ततो विन्ध्यं रावणो नर्मदां ययौ।
चलोपलजलां पुण्यां पश्चिमोदधिगामिनीम्॥ **7.31.19**॥

महिषैः सृमरैः सिंहैः शार्दूलर्क्षगजोत्तमैः।
उष्णाभितप्तैस्तृषितैः सङ्क्षोभितजलाशयाम्॥ **7.31.20**॥

चक्रवाकैः सकारण्डैः सहंसजलकुक्कुटैः।
सारसैश्च सदा मत्तैः कूजद्भिः सुसमावृताम्॥ **7.31.21**॥

फुल्लद्रुमकृतोत्तंसां चक्रवाकयुगस्तनीम्।
विस्तीर्णपुलिनश्रोणीं हंसावलिसुमेखलाम्॥ **7.31.22**॥

पुष्परेण्वनुलिप्ताङ्गीं जलफेनामलांशुकाम्।
जलावगाहसुस्पर्शीं फुल्लोत्पलसुभेक्षणाम्॥ **7.31.23**॥

पुष्पकादवरुह्याशु नर्मदां सरितां वराम्।
इष्टामिव वरां नारीमवगाह्य दशाननः॥ **7.31.24**॥

स तस्याः पुलिने रम्ये नानामुनिनिषेविते।
उपोपविष्टः सचिवैः सार्धं राक्षसपुङ्गवः॥ **7.31.25**॥

प्रख्याय नर्मदां सोऽथ गङ्गेयमिति रावणः।
नर्मदादर्शने हर्षमाप्तवान् स दशाननः॥ **7.31.26**॥

उवाच सचिवांस्तत्र सलीलं शुकसारणौ।
एष रश्मिसहस्रेण जगत् कृत्वेव काञ्चनम्॥ **7.31.27**॥

तीक्ष्णतापकरः सूर्यो नभसो मध्यमास्थितः।
मामासीनं विदित्वैव चन्द्रायति दिवाकरः॥ **7.31.28**॥

नर्मदाजलशीतश्च सुगन्धिः श्रमनाशनः।
मद्भयादनिलो ह्येष वात्यसौ सुसमाहितः॥ **7.31.29**॥

इयं वापि सरिच्छ्रेष्ठा नर्मदा नर्मवर्धिनी।
नक्रमीनविहङ्गोर्मिः सभयेवाङ्गना स्थिता॥ **7.31.30**॥

तद्भवन्तः क्षताः शस्त्रैर्नृपैरिन्द्रसमैर्युधि।
चन्दनस्य रसेनेव रुधिरेण समुक्षिताः॥ **7.31.31**॥

ते यूयमवगाहध्वं नर्मदां शर्मदां शुभाम्।
सार्वभौममुखा मत्ता गङ्गामिव महागजाः॥ **7.31.32**॥

अस्यां स्नात्वा महानद्यां पाप्मनो विप्रमोक्ष्यथ।
अहमप्यद्य पुलिने शरदिन्दुसमप्रभे॥ **7.31.33**॥

पुष्पोपहारं शनकैः करिष्यामि कपर्दिनः।
रावणेनैवमुक्तास्तु प्रहस्तशुकसारणाः॥ **7.31.34**॥

समहोदरधूम्राक्षा नर्मदां विजगाहिरे।
राक्षसेन्द्रगजैस्तैस्तु क्षोभिता नर्मदा नदी॥ **7.31.35**॥

वामनाञ्जनपद्माद्यैर्गङ्गा इव महागजैः।
ततस्ते राक्षसाः स्नात्वा नर्मदायां महाबलाः॥ **7.31.36**॥

उत्तीर्य पुष्पाण्याजह्रुर्बल्यर्थं रावणस्य तु।
नर्मदापुलिने हृद्ये शुभ्राभ्रसदृशप्रभे॥ **7.31.37**॥

राक्षसैस्तु मुहूर्तेन कृतः पुष्पमयो गिरिः।
पुष्पेषूपहृतेष्वेवं रावणो राक्षसेश्वरः॥ **7.31.38**॥

अवतीर्णो नदीं स्नातुं गङ्गामिव महागजः।
तत्र स्नात्वा च विधिवज्जप्त्वा जप्यमनुत्तमम्॥ **7.31.39**॥

नर्मदासलिलात् तस्मादुत्ततार स रावणः।
ततः क्लिन्नाम्बरं त्यक्त्वा शुक्लवस्त्रसमावृतः॥ **7.31.40**॥

रावणं प्राञ्जलिं यान्तमन्वयुः सर्वराक्षसाः।
तद्गतीवशमापन्ना मूर्तिमन्त इवाचलाः॥ **7.31.41** ॥

यत्र यत्र च याति स्म रावणो राक्षसेश्वरः।
जाम्बूनदमयं लिङ्गं तत्र तत्र स्म नीयते॥ **7.31.42** ॥

वालुकावेदिमध्ये तु तल्लिङ्गं स्थाप्य रावणः।
अर्चयामास गन्धैश्च पुष्पैश्चामृतगन्धिभिः॥ **7.31.43** ॥

ततः सतामार्तिहरं परं वरं
    वरप्रदं चन्द्रमयूखभूषणम्।
समर्चयित्वा स निशाचरो जगौ
    प्रसार्य हस्तान् प्रणनर्त चाग्रतः॥ **7.31.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकत्रिंशः सर्गः॥